पलं द्विपलन्तु पयः पिबेत्। पलमेकम्पिबेत्सर्पिस्त्रिरात्रं चोष्णमारुतमिति"। त्रिरात्रं चोष्णमारुतमिति त्रिरात्रमास्यपूरणमुष्णोदकवाष्पं पिबेदित्यर्थः। यदा तु शीतं क्षीरादि पीयते तदा शीतकृच्छ्रः "त्र्यहं शीतं पिबेत्तोयन्त्र्यहं शीतं पयः पिबेत्। त्र्यहं शीतं घृतम्पीत्वा वायुभक्षः परन्त्र्यहमिति" यमस्मरणात्। इति तप्तकृच्छ्रश्चतुर्विधः। पादकृच्छ्रमाह "एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः" या०। एकभक्तेन सकृद्भोजनेन दिवैव, नक्तेनेति पृथगुपादानात्। अतश्च दिवैव एकवारमेव भोजनेनैकमहोरात्रमतिवाहयेदिति। तत्र दिवेति रात्रिव्युदासः एकवारमिति द्विवारादिव्युदासः। भोजनेनेत्यभोजनव्युदासः। एतच्च कृच्छ्रादीनां व्रतरूपत्वात् पुरुषार्थभोजनपर्य्युदासेन कृच्छ्राङ्गभूतम्भोजनं विधीयते। तथा चापस्तम्बः "त्र्यहमनक्ताश्यदिवाशी च ततस्त्र्यहम्। त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किञ्चिदिति"। अत्र चानक्ताशीत्यनेन व्रते विहितणिनि प्रत्ययेन नक्तपर्युदासेन दिवाभोजननियमं दर्शयति। गौतमेनापीदमेव स्पष्टीकृतम् "हविष्यान् प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयादिति"। एवं नक्तभोजनविधावपि। न विद्यते याचितं यस्मिन् भोजने तदयाचितम् तेन कालविशेषानुपादानाद्दिवा रात्रौ वा सकृदत्येव तपोरूपत्वात् कृच्छ्राणां, द्वितीयभोजने तदनुपपत्तेः। अयाचितमिति न केवलं परकीयान्नयाचनप्रतिषेधोऽपि तु स्वीयमपि परिचारकभार्य्यादिभ्यो न याचितव्यम् प्रेषणाध्येषणयोः साधारणत्वाद्याच्ञायाः। अतः स्वगृहेऽपि भृत्यभार्य्यादयोऽनाज्ञाप्ता एव यदि भोजनमुपहरन्ति तर्हि भोक्तव्यं नान्यथा। अमुनैवाभिप्रायेणोक्तं गौतमेन "अथापरत्र्यहं न कञ्चन याचेतेति"। अत्र च ग्राससंख्यानियमः पराशरेण दर्शितः "सायन्तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः। चतुर्विंशतिरायाच्याः परन्निरशनं स्मृतमिति"। आपस्तम्बेन त्वन्यथोक्तम् "सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः। चतुर्विंशतिरायाच्याः परे निरशनायस्त्रः। कुक्कुटाण्डप्रमाणास्तु यथा वा संविशेन्मुखमिति"। अनयोश्च कल्पयोः शक्त्यपेक्षो विकल्पः। आपस्तम्बेन तु प्राजापत्यं चतुर्द्धा विभज्य चतुरः पादकृच्छ्रान् उक्त्वा वर्णानुरूपेण व्यवस्था कृता "त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम्। सायं त्र्यहन्तथा पादः प्रातः पादस्तथा त्र्यहम्। प्रातः पादं चरेच्छूद्रः सायं वैश्ये तु दापयेत्। अयाचितन्तु राजन्ये त्रिरात्रं ब्राह्मणे स्मृतमिति"। यदा तु याचितोपवासात्मकत्र्यहद्वयानुष्ठानं तदार्द्धकृच्छ्रः सायव्यतिरिक्तापरत्र्यहत्रयानुष्ठानन्तु पादोनमिति विज्ञेयम् "सायंप्रातर्विनार्द्धः स्यात्पादोनं नक्तवर्जितमिति" तेनैवोक्तत्वात्। अर्द्धकृच्छ्रस्य प्रकारान्तरमपि तेनैव दर्शितम् "सायंप्रातस्तथैकैकन्दिनद्वयमयाचितम्। दिनद्वयञ्च नाश्नीयात्कृच्छ्रार्द्धं तद्विधीयते" प्राजापत्यकृच्छ्रमाह "यथा कथञ्चित्त्रिगुणः प्राजापत्योऽयमुच्यते" या०। अयमेव पादकृच्छ्रः। यथाकथञ्चिद्दण्डकलितवदावृत्त्या स्वस्थानविवृद्ध्या वा। तत्राप्यानुलोम्येन प्रातिलोम्येन वा। तथा वक्ष्यमाणजपादियुक्तं तद्रहितं वा त्रिरभ्यस्तः प्राजापत्योऽभिधीयते। तत्र दण्डकलितवदावृत्तिपक्षो वशिष्ठेन दर्शितः "अहः प्रातरहर्नक्तमहरेकमयाचितम्। अहः पराकन्तत्रैकमेवञ्चतुरहोऽपरः। अनुग्रहार्थं विप्राणां मनुर्द्धर्म्मभृतां वरः। बालवृद्धातुरेष्वेव शिशुकृच्छ्रमुवाच हेति"। आनुलोम्येन स्वस्थानविवृद्धिपक्षस्तु मनुना दर्शितः "त्र्यहं प्रातः त्र्यहं सायं त्र्यहमद्यादयाचितम्। त्र्यहम्परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः" इति। प्रातिलोम्यावृत्तिस्तु वशिष्ठेन दर्शिता। "प्रतिलोमञ्चरेत्तुष्टः कृच्छ्रं चान्द्रायणोत्तरमिति"। जपादिरहितपक्षस्तु स्त्रीशूद्रादिविषयोऽङ्गिरसा दर्शितः "तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम्। प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमिति"। जपादियुक्तपक्षस्तु पारिशेष्याद्योग्यतया च त्रैवर्णिकविषयः स च गौतमेन दर्शितः। "अथातः कृच्छ्रान् व्याख्यास्यामो हविष्यान् प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयादथापरं त्र्यहं नक्तम्भुञ्जीताथापरं त्र्यहं न कञ्चन याचेताथापरं त्र्यहमुपवसेत्तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेदनार्य्यैर्न सम्भाषेत रौरवयौधाजपे नित्यं प्रयुञ्जीतानुसवनमुदकोपस्पर्शनमापोहिष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयीत हिरण्यवर्णाः शुचयः पावका इत्यष्टाभिरथोदकतर्पणं नमोहनाय नमोमोहनाय नमोधन्वने तापसाय पुनर्वसवे नमः। मौञ्ज्यायोर्म्याय वसुविन्दाय सर्वविन्दाय नमः। पाराय सुपाराय महापाराय पारदाय पारपाराय पारयिष्णवे नमः। रुद्राय पशुपतये म-